International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2024; 1(1): 57-60
© 2024 IJMH
www.themultijournal.com
Received: 17-04-2024
Accepted: 22-04-2024
Publish : 25-04-2024

**जया मनराल नेगी**
शोधच्छात्रा,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालय,नई दिल्ली

**Correspondence:**
**जया मनराल नेगी**
शोधच्छात्रा,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालय,नई दिल्ली

# भारतीयास्तिकनास्तिकदर्शनानां स्वरुपम्

**जया मनराल नेगी**

## सारांश

भारतीयदर्शनस्य विशालायां जटिलायाञ्च परम्परायां नास्तिकदर्शनानां महत्त्वपूर्णस्थानमस्ति।इमानि दर्शनानि यानि वैदिकसत्ताम् ईश्वरस्य च पारम्परिकविचारान् न स्वीकुर्वन्ति नैतिकताज्ञानमोक्षाणां स्वविशिष्टमार्गं प्रस्तुवन्ति।अत्र भारतीयनास्तिकदर्शनानां चार्वाकजैनबौद्धानामुपसंहारात्मकं मूल्याङ्कनम् प्रस्तूयते। तेषां प्रमुखेषु सिद्धान्तेषु अवदानेषु सीमासु च वार्ता क्रियते।

'दृश दर्शने"[1] इत्यस्माद् धातोः करणे 'ल्युट्' प्रत्ययं कृत्वा दर्शनमिति पदं सिद्धयति । अर्थः फलति दृश्यते अनेनेति दर्शनम्। येन माध्ययेन यथार्थज्ञानं प्रकाश्यते तदेव दर्शनमुच्यते। यथार्थज्ञाने तु प्रत्यक्ष-अनुमान-उपमान-शब्दादिकं प्रमाणं साधनम्। तच्च दर्शनं द्विविधम्- नास्तिकदर्शनम्, आस्तिकदर्शनञ्चेति । दर्शनेन स्थूलात् सौक्ष्म्यं प्रति, अज्ञानाद् ज्ञानं प्रति अथ च अज्ञाततथ्यात् ज्ञापनं प्रति गतिर्भवति ।

स्थूलरुपेण त्रीणि नास्तिकदर्शनानि सूक्ष्मरुपेण षड्नास्तिकानि च तथा च षड् आस्तिकदर्शनानि सन्ति। ते च चार्वाक जैन-बौद्धदर्शनानि ।
आस्तिकदर्शनानि - वैशेषिक न्याय सांख्य-योग-पूर्वमीमांसा-वेदान्तषडास्तिकदर्शनानि।
अत्र जिज्ञासा प्रवर्तते यत् किमिदं नास्तिकमास्तिकञ्च ? नास्तिकास्तिकयोः विषये उक्तम् -

**नास्तिवेदादितो लोक, इति येषां मतिः स्थिरा।**
**नास्तिकास्ते तथास्तीति, मतियेषान्ते आस्तिकाः ॥**[2]

**अस्यार्थः** "अस्ति परलोक इति मर्तियस्य स आस्तिकः"
एवञ्च

**"नास्ति परलोक इति मतिर्यस्य स नास्तिकः"**

व्याकरणशास्त्रदृष्ट्या "अस्ति नास्ति इति शब्दाभ्यां पाणिनीय "अस्तिनास्तिदिष्टं मतिः"[3] इत्यनेन सूत्रेण 'ठक्' प्रत्ययो भूत्वा 'आस्तिकं नास्तिकञ्च' इत्यनयोः शब्दयोः सिद्धिर्भवति।

**यद्वा अवैदिक प्रमाणानां सिद्धान्तानां प्रदर्शकाः।**
**चार्वाकाद्याः षड्विधास्ते ख्याताः लोकेषु नास्तिकः ।।**
**वेदप्रमाणकानीह प्राचुर्ये दर्शनानि षट्।**[4]
**न्यायवैशेषिकादीनि स्मृतास्ते आस्तिकाभिधाः॥**

**मैक्समूलरमहोदयैः उक्तं भारतीयदर्शनविषये-**
It was only a country like India with all its physical advantages and disadvantages, that such a rich development of philosophical thought as we can watch it in six system of philosophic could have taken place.[5]

इदानीं सर्वप्रथमं नास्तिकदर्शनानां संक्षेपेण परिचयः, अस्मिन् अध्याये प्रस्तूयते तदनन्तरमस्मिन्नेव अध्याये आस्तिकानां दर्शनानां परिचयोऽपि प्रस्तूयते ।

**नास्तिकदर्शनम्-**
'नास्तिको वेदनिन्दकः" इति मनोः कथनानुसारेण येषां वेदेषु, स्वर्गादिषु न वर्तते विश्वासस्ते 'नास्तिकाः' इति नाम्ना अभिज्ञायन्ते। यथोक्तम् एतेषां नास्तिकदर्शनानां मुख्यतया त्रयः सम्प्रदायाः समुप्लभ्यन्ते।

तेच

(i) चार्वाकदर्शनम्

(ii) जैनदर्शनम्

(iii) बौद्धदर्शनम्।

अत्राऽपि बौद्धानां चत्वारो भेदाः सम्प्रदायाः वा समुप्लभ्यन्ते-

(i) वैभाषिकः

(ii) सौत्रान्तिकः

(iii) योगाचारः

(iv) माध्यमिकश्च

अधुना सर्वप्रथमं चार्वाकदर्शनम्-

**चार्वाकदर्शनम् -** चार्वाकदर्शनस्य प्रणेता 'बृहस्पतिः'[6] वर्तते। अस्य दर्शनस्य अन्यानि

नामानि अपि सन्ति तानि नामानि अधोलिखितानि-

**लोकायतदर्शन, बार्हस्पत्यदर्शनं, नास्तिकदर्शनमित्यादयः चार्वाकानां नामानि।**

'प्रेयमार्गस्तु श्रेयमार्गस्य अपक्षेया सरलः रुचिकरश्च भवत्येव।

चार्वाकदर्शनस्य आदिसूत्राणां रचयिता 'बृहस्पतिराचार्यः' अस्ति। अस्य दर्शनस्य सूत्राणि अन्येभ्यो दर्शनशास्त्रेभ्यो उद्धृतम्। अस्य दर्शनस्य मतानुसारेण 'प्रत्यक्षमेव' केवलप्रमाणभूतं वर्तते।

एतन्मते पृथ्व्यादिचत्वारि भूतानि वर्तन्ते। तेभ्य एव चैतन्यमुत्पद्यते।

**'अत्र चत्वारि भूतानि भूमिर्वायवनलानिलाः।"**[7]

**चतुर्थ्यः खलु भूतेभ्यः, चैतन्यम् उपजायते।।**

चैतन्यविशिष्टशरीरमेव पुरुषः। जडरुपाणां भूतानां सम्मेलनेन एव चैतन्यं जायते।चार्वाकानां मते स्वभावेनैव 'जगदुत्पद्यते'। चार्वाकदार्शनिकानां मते नास्ति 'ईश्वरस्य' सत्ता। चार्वाकानुसारेण मरणमेव मोक्षः। नास्ति कश्चित् स्वर्गः ।

**न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः।**[8]

**नैव वर्णाश्रमादीनां, क्रियाश्च फलदायिकाः ॥**

चार्वाकमतानुसारेण वेदस्य कर्तारः धूर्तमूढश्च वर्तन्ते ।

**त्रयो वेदस्य कर्त्तारो भाण्ड-धूर्त्त-निशाचराः।"**[9]

**जर्फरी-तुर्फरीत्यादि, पण्डितानां वचः स्मृतः॥**

चार्वाकस्तु 'देह एवात्मा' इति स्वीकरोति। देहात्मवादे च स्थूलोह, कृशोहम् इत्यादयाः

युक्तयः उपस्थापयति।

**चार्वाकवादिनोः वदन्ति**

**यावात् जीवेत् सुखं जीवेद्, ऋणं कृत्वा घृतं पिबेत्।"**[10]

**भस्मीभूतस्य वेहस्य, पुनरागमनं कुतः ।।**

**बौद्धदर्शनम् -**

दर्शनमिदमपि नास्तिकदर्शनमस्ति। दर्शनेऽस्मिन् 'वेदस्य' निन्दा कृताऽस्ति। बौद्ध दर्शनस्य आधारः जैनदर्शनं वर्तते इत्यस्मिन् विषये अस्ति मतभेदः। दर्शनस्यास्य प्रवर्तकः 'भगवत्बुद्धो' वर्तते। तस्माद् उच्चरित ये सिद्धान्ताः यस्मिन् दर्शने विद्यते तदेव दर्शनं बौद्धदर्शनमिति नाम्नाऽभिधीयते। बुद्धेः यदुपदेशं 'सारनाथे' भाषितं। ते आर्यसत्यमिति नाम्ना ज्ञायते। ते च-

**दुःखसमुदायनिरोधमार्गश्चत्वारः आर्य -**

**बुद्धस्याभिमतानि तत्त्वानि ।"**[11]

बौद्धदर्शनस्य चत्वारः सम्प्रदायाः सन्ति। बौद्धाश्चर्तुविधया भावनया परमपुरुषार्थं कथयन्ति। ते एव 'माध्यमिक योगाचार-सौत्रान्तिक वैभाषिकाः इति नामभिः प्रसिद्धाः सन्ति।

माध्यमिकः- सर्वशून्यत्वं स्वीकरोति।

योगाचारः- बाह्यार्थशून्यत्वं स्वीकरोति।

सौत्रान्तिकः- बाह्यार्थानुमेयत्वं स्वीकरोति।

वैभाषिकः- बाह्ययार्थप्रत्यक्षत्वं स्वीकरोति।

बौद्धाः यथाक्रमं - सर्व क्षणिक, सर्वदुःखं, सर्वं स्वलक्षणं, सर्वशून्यमिति स्वीकरोति ।

एतेषां चतुर्णां बौद्धसम्प्रदायानां संक्षिप्तपरिचयः अत्र प्रस्तूयते।

**1. माध्यमिक दर्शनम् -** माध्यमिकस्य एव अपरनाम 'शून्यवादी' इति प्रवर्तते। एतेषां बौद्धानां मते सर्वेऽपि जगतः पदार्थाः शून्यरूपाः सन्ति। उक्तं च मुख्यो माध्यमिको विवर्तमखिलं शून्यस्य मेने जगत्।

**2. योगाचारदर्शनम् -** योगाचारदार्शनिकाः सर्वप्रथमं तु शून्यवादम् अङ्गीकरोति/कुर्वन्ति तदनन्तरं ते अन्तरं यद् ज्ञानं वर्तते तत् न शून्यमिति स्वीकरोति । तेषां मते शुद्धवि ज्ञानादाय एव मुक्तिः इति।

**3. सौत्रान्तिकदर्शनम् -** सौत्रान्तिकदार्शनिकानां मते एकैव भिन्नता वर्तते। सा च प्रत्यक्षं विना अनुमानेन बाह्यावस्तुसत्ताम् अङ्गीकरणम्।

**4. वैभाषिकदर्शनम् -** वैभाषिकैः जगतो बाह्याभ्यन्तरसमस्तपदार्थाः सत्यभूताः वर्तन्ते। इत्येव ।

वैभाषिकाः प्रमाणद्वयमङ्गीकुर्वन्ति। प्रत्यक्षमनुमानञ्च इति।

प्रमाण भेदाः

(1)इन्द्रियज्ञानम् (2)मनोविज्ञानम् (3) आत्मसंवेदनम् (4) योगिज्ञानम्

स्वार्थानुमानम्

साधर्म्यात्

अनुमान

परार्थानुमान्

वैधर्म्या

**जैनदर्शनम् -**

दर्शनमिदमपि 'नास्तिकदर्शनम्'। वस्तुतस्तु जैनबौद्धयोर्मध्ये नाऽस्ति कश्चित् भेदाः इति समालोचककानां मतमस्ति। उभयोः प्रादुर्भावः अपि समानसमये एव अभवत्। जैनदर्शनस्य प्रथमः प्रवर्तको वर्तते 'ऋषभनाथः। दर्शनस्याऽस्य 24 तीर्थंऽकराः अस्य दर्शनस्य धर्मस्य वा प्रचाराय प्रसाराय स्वभूमिकां निव्यूढवन्तः।

ऋषभेदवस्यापर नाम 'आदिनाथः' अथ च ऋग्वेदे 'अरिष्टनेमिः' इति वर्तते।

**"स्वस्ति नस्तार्थ्यो 'अरिष्टनेमिः "**[12]

अन्तिमोः 'महावीरः' प्रवर्तकः। अस्य पूर्णनाम वर्धमानमहावीरः इति। तमिल भाषायां 'अरुकदेवन्' इत्युच्यते। वीरः, वीरप्रभुः, सन्मतिः, अतिवीरः इत्यादयः अस्यापरनामानिसन्ति। अस्य पिता 'सिद्धार्थः' माताऽस्य 'त्रिशला' वर्तते। महावीरस्य 'एकादश गणधराः' आसन्।

जैनदर्शनस्य विषयवस्तु जैनानां मते संसारस्य सर्वेषां वस्तूनां परिणामः सप्तभिःतत्वैः भवति।

(1) जीवः

(2) अजीवः

(3) आस्रवः

(4) बन्धः

(5) सम्वरः

(6) निर्जरा

(7) मोक्षश्च।

जैनानुसारेण जीवाजीवौ द्रव्यम्।

जीवः- जीवः आत्मा चेतनं वा भवति। अस्मिन् पञ्चभावप्राणाः विद्यन्ते।

(1) औपशामिकः

(2) क्षायिकः

(3) क्षायोपशमिकः

(4) औदायिकः

(5) पारिणामिकश्च ।

भेद-अयं जीवो द्विधा विभज्यते। बद्धजीवः मुक्तजीवश्चेति ।

**अजीवः-**

जैनानुसारेण द्वितीयं द्रव्यमस्ति 'अजीवः अजीवे येषां शरीरं भवति ते अजीवकायाः इति। ते व्यापकाः भवन्ति। अस्य कृते 'प्रदेशः' इति नामपदं प्रयुक्तमस्ति। अस्याऽपि भेदद्वयम् अस्तिकायम्-अनास्तिकायम् इति।

**जैनरत्नत्रयम्-** दुःखत्रयविनाशाय त्रिरत्नमावश्यकमिति। ते च (1)सम्यग्दर्शनम्(2) सम्यज्ज्ञानम् (3) सम्यक् चरित्रम्।

सम्प्रदायः - द्विधा सम्प्रदायः विभज्यते श्वेताम्बरः, दिगम्बरश्च।

**जैनानां पञ्चव्रतानि** (1) अहिंसा (2) सत्यम् (3) अस्तेयम् (4) ब्रह्मचर्यम्(5) अपरिग्रहः।

जैनस्याऽनेकान्त वादः- सप्तभङ्गिनय इति नाम्नाऽपि अभिधत्ते ।

(1) स्यादस्ति

(2) स्यान्नास्ति

(3) स्यादस्ति च नास्ति

(4) स्यादवक्तव्यम्

(5) स्यादास्ति चावक्तव्यम्

(6) स्यान्नास्ति चावक्तव्यम्

(7) स्यादस्ति च नास्ति च अवक्तव्यम्।

**प्रमाणविचारः**-जैनानां मतेऽपि प्रमाणद्वयमेव वर्तते। प्रत्यक्षानुमानभेदेन।

जैनशुभचिह्नानि (1)स्वस्तिकम् (2)श्रीवत्सम् (3) नन्धावर्त्यम् (4)वर्धमानकम् (5) भद्रासनम् (6) कलसम् (7) मीनयुगलम् (8) दर्पणश्चेति।

**उपसंहारः**

भारतीयदर्शनस्य विशालायां जटिलायाञ्च परम्परायां नास्तिक-दर्शनानां महत्त्वपूर्णस्थानमस्ति। इमानि दर्शनानि यानि वैदिकसत्ताम् ईश्वरस्य च पारम्परिकविचारान् न स्वीकुर्वन्ति नैतिकताज्ञानमोक्षाणां स्वविशिष्टमार्गं प्रस्तुवन्ति। अत्र भारतीयनास्तिकदर्शनानां चार्वाक-जैनबौद्धानामुपसंहारात्मकं मूल्याङ्कनम् प्रस्तूयते। तेषां प्रमुखेषु सिद्धान्तेषु अवदानेषु सीमासु च वार्ता क्रियते।

**चार्वाकदर्शनम्-** चार्वाकदर्शनं यत्तु लोकायतनाम्नाऽपि ज्ञायते प्रत्यक्षानुभवाधारितं भौतिकवादिदर्शनमस्ति। इदमनुमानोपमान-शब्दसदृशानि ज्ञानसयान्यानि सर्वसाधनानि उपेक्षयति। अस्याः तत्त्वमीमांसा विशुद्धतया भौतिकास्ति यस्यां चेतना भौतिकतत्त्वानामुत्पादस्वरूपा मन्यते। अस्य नैतिकता सुखवादिनी वर्तते यस्यां सांसारिकसुखानां प्राप्तिः जीवनस्य परमलक्ष्यं मन्यते। धार्मिककर्मकाण्डानां परलोकस्यास्तित्त्वस्य च तस्यालोचनया तत्कालीनासामाजिकी धार्मिकी च व्यवस्था गहनतया प्रभाविता जाता।

**जैनदर्शनम्-** वेदबाह्यत्वाद् दर्शनमिदं नास्तिकं कथ्यते। इदं वैदिकदेवानां एकास्य स्थायिनः आत्मनश्चावधारणामस्वीकरोति। इदं जीवाजीवयेः द्वैतवादिब्रह्माण्डविज्ञानं प्रतिपादयति। अस्य केन्द्रीय-सिद्धान्ताः अहिंसा अनेकान्तवादः अपरिग्रहश्च सन्ति। कर्मसञ्चयं समाप्य कैवल्यं (मोक्षः) प्राप्तुं शक्यते यस्मै कठोरतपस्या नैतिका-चरणञ्च आवश्यकमनेन प्रतिपादितम्।

**बौद्धदर्शनम्-**इदमपि वैदिकदेवानामेकस्थाप्यात्मनश्च अवधारणामस्वीकरोति। अस्य चत्वारि आर्यसत्यानि दुःखं दुःखकारणं दुःखनिवारणं दुःखनिवारणमार्गश्च अस्य दार्शनिकाधारं निर्मान्ति। बौद्धदर्शनमनात्मवादि क्षणभङ्गुरवादि कर्मसिद्धान्तवादि च वर्तते। अस्य लक्ष्यं निर्वाणं सर्वदुःखमुक्तेः अवस्था अष्टाङ्गिकमार्गाभ्यासेन प्राप्यते।

**पाद टिप्पणी –**

1. भ्वादिगण
2. दर्शनशास्त्र का इतिहास
3. अ. 4/4/6
4. प्राच्य दर्शन, पृ. 29
5. Maxmuller - E, Six system of India Philosophy, p. viii
6. मनु. - 2.11
7. चा.सि.-14
8. चा.सि.-2
9. चा. सि.-11
10. चा.सि.-10
11. बौद्धदर्शनम्
12. ऋ.वे. 10-89/6